श्री अय्यप्प पंचरत्नमु

लोकवीरं महापूज्यं सर्वरक्षाकरं विभुम् |
पार्वती हृदयानंदं शास्तारं प्रणमाम्यहम् || 1 ||

विप्रपूज्यं विश्ववंद्यं विष्णुशंभोः प्रियं सुतम् |
क्षिप्रप्रसादनिरतं शास्तारं प्रणमाम्यहम् || 2 ||

मत्तमातंगगमनं कारुण्यामृतपूरितम् |
सर्वविघ्नहरं देवं शास्तारं प्रणमाम्यहम् || 3 ||

अस्मत्कुलेश्वरं देवमस्मच्छत्रुविनाशनम् |
अस्मदिष्टप्रदातारं शास्तारं प्रणमाम्यहम् || 4 ||

पांड्येश वंशतिलकं केरळे केळिविग्रहम् |
आर्तत्राणपरं देवं शास्तारं प्रणमाम्यहम् || 5 ||

फलश्रुति:
पंचरत्नाख्यमेतद्यो नित्यं शुद्धः पठेन्नरः |
तस्य प्रसन्नो भगवान् शास्ता वसति मानसे ||

॥ इति श्री शास्ता पंचरत्नमु ॥

श्री शास्ता नमस्कार श्लोकालु

त्रयंबकपुराधीशं गणाधिपसमन्वितम् |
गजारूढमहं वंदे शास्तारं प्रणमाम्यहम् || 1 ||

शिववीर्यसमुद्भूतं श्रीनिवासतनूद्भवम् |
शिखिवाहानुजं वंदे शास्तारं प्रणमाम्यहम् || 2 ||

यस्य धन्वंतरिर्माता पिता देवो महेश्वरः |
तं शास्तारमहं वंदे महारोगनिवारणम् || 3 ||

भूतनाथ सदानंद सर्वभूतदयापर |
रक्ष रक्ष महाबाहो शास्त्रे तुभ्यं नमो नमः || 4 ||